# अथ श्रीशगुणदर्पणम्

या सुगंधास्यनासादिनवद्वाराऽखिलेन या ।
दुराधर्षा सर्वसस्योदयार्थं या करीषिणी ॥१॥

या नित्यपुष्टा सर्वाङ्गैः सौन्दर्यादिगुणैरपि ।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥२॥

मातर्लक्ष्मि नमस्तुभ्यं माधवप्रियभामिनि ।
युवां विश्वस्य पितराावितरेतरयोगिनौ ॥३॥

समना किल मातस्त्वममुना ततयोगिनी ।
मम नाथेन नैव स्या विमनाश्चन स त्वयि ॥४॥

त्वं वेदमानिनी वेदवेद्यः किल स ते प्रियः ।
त्वं मूलप्रकृतिर्देवी स दिव्यपुरुषः किल ॥५॥

यस्त्वामुरसि धत्तेऽम्ब कौस्तुभद्युतिभासिते ।
स त्वां नैवाच्युतः सर्वस्यात्यये सत्यपि त्यजेत् ॥६॥

देवि त्वं ललनारत्नं देवोऽसौ पुरुषोत्तमः ।
युवां युवानौ सततं युवयोर्न वयोऽधिकः ॥७॥

त्वं पद्मिनी पद्मवक्त्रा पद्माक्षी पद्मविष्टरा ।
पद्मद्वयकरा पद्मकोशाभस्तनशोभना ॥८॥

पद्महस्ता पद्मपादा पद्मनाभमनःप्रिया ।
पद्मोद्भवस्य जननी पद्मा च वरवर्णिनी ॥९॥

अम्बां पीताम्बरश्रोणीं लम्बालकलसन्मुखीम् ।
बिम्बाधरोष्ठीं कस्तूरीजम्बालतिलकां भजे ॥१०॥

रत्नोद्दीप्तसुमाङ्गल्यसूत्रावृतशिरोधराम् ।
कुण्डलप्रभयोद्दण्डगण्डमण्डलमण्डिताम् ॥११॥

कुचकञ्चुकसञ्चारिहारानीकमनोहराम् ।
काञ्चीकिङ्किणिमञ्जीरकङ्कणाद्यैरलङ्कृताम् ॥१२॥

सुवर्णमण्डपे रत्नचित्रसिंहासनोत्तमे ।
नमामि हरिणा साकमिन्दिरां कृतमन्दिराम् ॥१३॥

ब्रह्माद्या विबुधश्रेष्ठा ब्रह्माण्याद्याः सुराङ्गनाः ।
यां पूजयन्ति सेवन्ते सा मां पातु रमा सदा ॥१४॥

सर्वालङ्कारभरितौ सर्वसद्गुणमण्डितौ ।
शर्वादिसर्वभक्तौघसर्वसम्पद्विधायकौ ॥१५॥

सुमुखौ सुन्दरतरौ सुनासौ सुखचित्तनू ।
सुराराधितपादाब्जौ रमानारायणौ स्तुमः ॥१६॥

चतुष्कपर्दा या देवी चतुरास्यादिभिः स्तुता ।
चतुर्वेदोदितगुणा चतुमूर्तेर्हरेः प्रिया ॥१८॥

घृतप्रतीकां तां नित्यं घृतपूर्णान्नदायिनीम् ।
यथेष्टवित्तदात्रीं च नतोऽस्म्यभयदा श्रियम् ॥१९॥

वादिराजेन रचितं श्रीश्रीशगुणदर्पणम् ।
इमं स्तवं पठन् मर्त्यः श्रीमान् स्यान्नात्र संशयः ॥२०॥

॥ इति श्रीमन्महाभारते विराटपर्वणि धर्मराजप्रोक्तं दुर्गास्तोत्रम् ॥